# एकचक्रम्

(संस्कृतलघुरूपकम्)

रचयिता

विद्वान् एन्. रङ्गनाथशर्मा

अखिल कर्णाटक संस्कृत परिषत्

बेङ्गलूरु–५६००१९

Akhila Karnataka Samskrita Parishat Publication–22

विदुषा नडहल्ली रङ्गनाथशर्मणा प्रणीतम्

# एकचक्रम्

संस्कृतलघुरूपकम्

# EKACHAKRAM

(A Play in Sanskrit)

*By*

**VIDWAN N. RANGANATHA SHARMA**

*With an Appreciation*

**By**

**Dr. K. KRISHNAMOORTHY**

*Published by*

**AKHILA KARNATAKA SAMSKRITA PARISHAT**
**Bangalore Branch**
Gokhale Institute Premises, Bull Temple Road
N.R. Colony, Bangalore–560019

EKACHAKRAM—A short play in Sanskrit by
Vidwan N. Ranganatha Sharma

First Edition: 1990

Copies: 500

**Price: Five Rupees**

© Akhila Karnataka Samskrita Parishat

*Publisher :*

Dr. B. S. RAMAKRISHNA RAO
*President*
Akhila Karnataka Samskrita Parishat
Bangalore Branch
Gokhale Institute Premises, Bull Temple Road
N. R. Colony, Bangalore-560019

*Printed at :*

PRABHA PRINTING HOUSE
Dr. D.V.G. Road, Basavanagudi, Bangalore-560004

# प्राक्कथनम्

विदुषा नडहल्ली रङ्गनाथशर्मणा प्रणीतम् एकचक्राभिधं नूतनं लघुरूपकम् अखिल-कर्णाटक-संस्कृत-परिषदः मुखेन प्रकाशयितुं मोमुद्यते मे स्वान्तम् । श्री रङ्गनाथशर्मा महोदयः कर्णाटकराज्यस्य वर्तमानसंस्कृतविद्वत्सु कविषु च श्रेष्ठः । अयं महानुभावः व्याकरण-शास्त्रे अलङ्कारशास्त्रे अद्वैतवेदान्ते कन्नडे च नितरां निष्णातः । श्रीचामराजेन्द्र संस्कृतमहापाठशालायां संस्कृत व्याकरणप्राध्यापको भूत्वा विश्रान्तोऽयं महाशयः संस्कृतभाषया कन्नडभाषया च परश्शतं लेखान् ग्रन्थांश्च प्राणयत् । संस्कृतपठ्यग्रन्थसमितीनां नैकसङ्घसंस्थानां च सदस्यः अध्यक्षो वा भूत्वा संस्कृतसेवा सततं कृता श्रीमता । अखिलकर्णाटकसंस्कृतपरिषदः पञ्चमसम्मेलनस्य आध्यक्ष्यं श्री शर्मणैव ऊढम् । राज्य सर्वकार-केन्द्रसर्वकार-मठमन्दिर संघसंस्थाभिः संमानितः श्रीशर्मामहोदयः सहृदयः सज्जनः संप्रदायनिष्ठः सदाचारवांश्च वर्तते । श्रीमतः बाहुबलिविजयाख्यं संस्कृतरूपकं सुप्रसिद्धमेव । स्वस्य पञ्च-सप्ततितमेऽस्मिन् संवत्सरे लघुरूपकमिदं प्रकाशयितुमनुमतिरनेन प्रदत्ता तदवसरश्च अस्मभ्यं लब्ध इति भागधेयस्य स्थानम् । डा. के. कृष्णमूर्ति महोदयः अस्मत्प्रार्थनामूरीकृत्य आंग्लभाषया रूपकपरिचयात्मकं प्रशंसा-निबन्धं विलिख्य साहाय्यमकरोत् । श्रीसुरसरस्वतीसभायाः एस्. राम-चन्द्रशास्त्री महोदयेन मुद्रणविषये बहुविधं साह्यमकारि। प्रभामुद्रणालयस्य कृष्णाचार्यवर्यः च साधु मुद्रणमकरोत् एतेभ्यः भूरि भूरि वन्दनानि ।

संस्कृतोत्सवः
६-८-१९९०

बा. श्री. रामकृष्णराव्
बेङ्गलूरु

# "EKACHAKRAM"

*by*

**Vidwan N. Ranganatha Sharma**

## AN APPRECIATION

The Mahābhārata has been an infinite source of inspiration for generations and generations of creative poets and dramatists in Sanskrit and regional languages of India for well over twenty centuries. The reason is not far to seek. It abounds in situations and episodes which provide full scope for the flowering of the entire gamut of human emotions and for the covert inculcation of time-tested ethical values (which make life worth living) in a soul-stirring and heart-warming epic background. The characters are intensely human though rising to divine heights of heroism, altruism and righteousness.

Some of the greatest dramatists in Sanskrit are those who were inspired by the Mahābhārata theme. Among them, Bhāsa stands out as a supreme master since he unbared the quintessence of the great epic by imaginatively representing the most climactic epic scenes in short plays. Often startling us with his adroit innovations in details which add up to the intensity of the total atmosphere and the hidden psychology of the major characters, he makes the epic come alive before us most vividly. As Bhāsa was a genius, he brought a novel touch of realism into the delineation of even minor characters; which is hailed as a major contribution of Bhāsa to Sanskrit drama. To this were added a power of passion and declamatory discourse

by that most outstanding playwright, Bhaṭṭa Nārāyaṇa who exploited most Bhavabhūti's way of bombastic and beauteous wordiness in description. Even Kannada poets of repute like Pampa and Ranna were indebted to this Sanskrit drama *Veṇīsaṁhāra* in their successful attainment of a dramatic touch even in their *campūs* on the Mahābhārata theme. To crown it all, with the passage of time, there arose an innumerable host of anonymous folk-writers who wrote *Yakshagāna* scripts on different key episodes of the epics for performance in the folk theatre. These performances have enthralled audiences for whole nights, and their wide appeal can be seen even today. Blood and thunder, horror and fury, romance and wonder—these are their unfailing fireworks. The story of Bhima's killing the demon Baka in single combat is one of them.

Against this background, I am so charmed by reading the playlet on this theme in Sanskrit by my friend, Vidwan N. Ranganatha Sharma whose erudition in Sanskrit is equal to his imaginative creativity in that medium. Among modern writers in Sanskrit there are few today who combine these two gifts in the same measure. Classical perfection is not a thing of the past. Classical rules can yet help a writer reach heights as appealing today as ever before. This is proved to the hilt by this short drama in Sanskrit which does not fall in line with any of the fashions of a so-called modernist sensibility, which all of us see daily on the screen of the cinema and television.

The all-time human and elemental emotion of love and affection which binds a family together is in jeopardy because of the menace of a crazy demon, viz., Bakāsura; and everyone in the town of Ekachakra (one-wheel) is

haunted by the prospect of his turn to be grabbed and gobbled up by the all-devouring demon, since such is the unholy contract accepted by the selfish ruler of the town who wishes to save himself at the cost of his own subjects. A sensitive reader can catch a glimpse here of the wily politician's greed in a decadent democracy. Kunti, with her five heroic sons is living under the roof of a good Brahmin in that town whose peace is all in jolt like that of a cart with a single wheel. They are in the disguise of brahmins to hoodwink Duryodhana who is after their blood. The able dramatist has succeeded in showing the rise of conflicting sentiments to a climax and their happy denouement—all in the course of a single day. The tender sentiments overflow in the man, wife and child of that illfated family in the hour of crisis; each one of them is eager to die for the sake of the others. Ethical idealism cannot go farther! At this point, Kuntī, though only a passing lodger of that family, pities them so much that she offers to send one of her own sons, Bhima, even without consulting him or her other sons. This reminds us of the stories of Śibi and Jīmūtavāhana in our mythology. Bhima's brothers too are loth to part from him at the first instance; but such is the supreme self-confidence of the hero, Bhima, in his own strength and Kunti's conviction that he would surely kill the demon that he sportively takes up the challenge, kills the demon and saves the town from danger. If the theme of gluttony raises the comic sentiment, the sentiments of *karuṇa*, *bhayānaka*, *raudra* and *adbhuta* have been fully nourished and delineated in such a simple, succinct and scintillating style—all embroidered with tuneful verses and homely maxims—that we begin to wonder

if this is a play from the pen of Bhāsa himself! To suit modern taste, descriptions are short, action is swift and dialogue powerful. I have no doubt that when performed, this short and stageworthy play will win applause not only from the select circle of Sanskrit pundits, but the general public all over India speaking different regional languages too, because the drama is so packed with action and feeling, the style is so easy and vocabulary so common to one and all tongues. Such a combination of ease and grace, brevity and beauty should appeal to laymen also. I heartily congratulate the author on his unique achievement!

**Dr. K. KRISHNAMOORTHY**
Retd. Professor of Sanskrit
'Sai Kuteer', 32, III Main,
Jayanagar,
Mysore-570 014

# एकचक्रम्

## (कथासंक्षेपः)

इदं हि श्रीमन्महाभारतस्य आदिपर्वणि निरूपितं कथांशमाधृत्य प्रणीतमेकं रूपकम्। जतुगृहान्निःसृताः पाण्डवाः व्यासमुनेरादेशं पालयितुमेकचक्राभिधां नगरीं प्रयाताः। तत्र च कस्यचिद् विप्रस्य निवेशने ब्राह्मणवेषं परिगृह्य निवसन्तो भैक्षेण कालं यापयन्ति स्म। नगर्या नातिदूरे गिरौ बकनामा कश्चिदसुरो न्यवसत्। तद्भयादेकचक्राया राज्ञा बकासुरेण सह किमपि सन्धिविधानं कल्पितमासीत्। तद्यथा—

वेतनं तस्य निहितं शालिवाहस्य भोजनम्।
महिषौ पुरुषश्चैको यस्तमादाय गच्छति ॥

प्रतिदिनं प्रेष्यमाणं तत्सर्वं बको भक्षयति स्म। प्रजास्वन्यतमेन सर्वमिदं पर्यायेण निर्वाह्यमित्यासीत् नृपशासनम्। सत्येवं सन्धिविधाने, यस्य गृहे पाण्डवा न्यवसन् तस्य विप्रस्य वारः पर्यायेणागतः। आगामिनि पर्यायदिने पूर्वस्यां रात्रौ स विप्रः पत्न्या पुत्र्या च सहोपविष्टः समुपस्थितां विपदमनुचिन्त्य विलपन् शोकसंतप्तो बभूव। तेषाञ्च रोदनध्वनिं निशम्य कुन्ती तत्र गत्वा ब्राह्मणं रोदननिमित्तं पृष्टवती। परिज्ञाते च शोकनिमित्ते "विप्र, मा भूद्विषादः। मम पुत्रेष्वन्यतमं प्रभाते बकासुरनिकटं प्रेषयिष्यामि। स खलु तं राक्षसं निहन्तुं समर्थः" इति ब्रुवती विप्रं सान्त्वयामास। 'भीमसेनं प्रेरयामि। ध्रुवं स राक्षसं घातयितुमलम्' इति तस्या हार्द अभिप्राय आसीत्।

भिक्षाचरणार्थं प्रयातो भीमसेनः प्रथमं गृहमाययौ । मात्रा निवेदितमुदन्तं श्रुत्वा स परितुष्टमना बभूव। ततः परमागता युधिष्ठिरादयस्तु व्यषीदन् । भीमस्तान् समादधे। परेद्युः सर्वं भक्ष्यजातं शकटमारोप्य बली भीमसेन एकाकी बकासुरसमीपं प्रतस्थे। समनन्तरं भीमसेन-बकासुरयोः परस्परं मल्लयुद्धं प्रावर्तत । बको भीमेन निहतः पतितः ।

अल्पग्रन्थमिदं रूपकमेकघण्टाभ्यन्तर एव शक्यं प्रदर्शयितुम्। बहुप्रकारं नेपथ्यविशेषश्चेदं नापेक्षते । अभिनिनीषूणां छात्राणामस्ति प्रयोजनमिति कृत्वा सरलया शैल्या प्राणैषमिदं रूपकम्। परिशीलयन्तु सज्जनाः। जीयाद् गीर्वाणभारती ।

बेङ्गलूरुनगरी
ता. ३०-३-१९९०

—एन्. रङ्गनाथशर्मा

# एकचक्रम्

# एकचक्रम्

## पात्रपट्टिका

१. सूत्रधारः

२. कुन्ती

३. भीमः

४. युधिष्ठिरः

५. अर्जुनः

६. नकुलः

७. सहदेवः

८. ब्राह्मणः

९. ब्राह्मणी

१०. कन्यका

११. बालकः

१२. बकः

॥ श्रीः ॥

# एकचक्रम्

(नान्द्यन्ते सूत्रधारः)

निखिलजगदधीशं सर्वधीसाक्षिभूतं
शबलितगुणयोगात् कल्पिते विश्वरङ्गे ।
निरवधिनवनाट्ये नर्तयन्तं नटन्तं
प्रणमत विभुमाद्यं सूत्रधारं महान्तम् ॥ १ ॥

(पुष्पाणि विकीर्य)

**सूत्रधारः**—अहो ! धन्येयं भारतभूमिः । यैषा—

गिरिवनजलपुष्पैः सर्वतः शोभमाना
मृदुवहपवमाना पावनी रत्नगर्भा ।
शुभचरितविधात्री धर्मशान्त्योः सवित्री
मम हृदयमुपास्ते सौख्यदात्री प्रजानाम् ॥ २ ॥

वेदवेदाङ्गविदुषां समस्तजनकल्याणकाङ्क्षिणां जन्मभूमिरियम् । साधु खल्विदमुच्यते—

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥ ३ ॥

इति । परन्तु कालमहिमा दुरत्ययः । उत्पद्यते किल जनो यो दुर्मनायते गुणेषु । य एषः सनातनीं सूनृतां संस्कृतवाणीं

निन्दति, सौरीं प्रभामपलपति, चान्द्रमसीं पटेनाच्छादयति। भवति किल कण्टकीतरुराम्रवणेषु। भारतजननी सम्प्रति—

सत्यपि प्राज्यसाम्राज्ये सत्सु प्राज्ञसुतेष्वपि।
दुर्जनैरभिभूतैषा कुन्तीव परिशोचति ॥ ४ ॥

(निर्गच्छति)

(ततः प्रविशति कुन्ती)

कुन्ती—( आत्मगतम् ) अहमस्मि कुन्तीभोजेन पालिता कुन्तीति विश्रुता लोके। पितृसङ्केतितं 'पृथा' इति नामधेयं तु जनैर्विस्मृतप्रायम्। शूरसेनमहाराजो मे पिता। मारिषा च माता। हन्त! स्वप्नायितमिव मे पित्रोः स्मरणम्।

नारीणां सौख्यत्रयमामनन्ति वृद्धाः। शैशवे पितृसौख्यम्, यौवने पतिसौख्यम्, वार्धके पुत्रसौख्यञ्चेति। अहं तु सौख्यत्रयेणापि वञ्चितास्मि मन्दभाग्या। शैशव एव मातापितृभ्यां विरहिता कुन्तीभोजाय दत्तास्मि। यौवने च पाण्डुचक्रवर्तिनः पट्टाभिषिक्ता महिषी क्षणमन्वभवं राजभोगं, विद्युद्विलसितमिव यामिनी। शापोपहतेन भर्त्रा सह वनाद्वनमटन्ती तेनापि विप्रयुक्ता। वार्धके च गतिरीदृशी।

हन्त! अस्ति कुरुपितामहः परपुरञ्जयो भीष्मः। अस्ति मे देवरो महामना धृतराष्ट्रः। अस्ति च विद्यागुरुर्द्रोणाचार्यः कृपाचार्यश्च। द्वेधा विभक्तं तु भारतसाम्राज्यं, दायादमात्सर्येण केवलम्।

पञ्च मे पुत्राः सन्ति देवेन्द्रकल्पाः भरतवंशप्रदीपाः । अहो दैवपारुष्यम् ! एकचक्रायामेते भिक्षामटन्ति । कष्टं भोः कष्टम् !

भाग्यशाली प्रसूतव्यो न शूरो न च पण्डितः ।
शूराश्च कृतविद्याश्च मत्पुत्रा भैक्षजीविनः ॥ ५ ॥

(ततः प्रविशति भीमसेनो भिक्षापात्रहस्तः)

**भीमः**—( सोद्वेगमात्मगतम् )

जन्मापि वंशे विशदे हिमांशोः
दायादता पाण्डुमहीश्वरस्य ।
भैक्षेण वृत्तिः परगेहवासः
धिग् भीमसेनं धिगिमौ च बाहू ॥ ६ ॥

(पुनरपि) धिग् भीमसेनं धिगिमौ च बाहू ।

**कुन्ती**—(आलोक्य) सोद्वेग इव लक्ष्यते वत्सो भीमः ।

**भीमः**—साधु लक्षितम् ।

सवित्री शूराणां कुरुकुलमहीशस्य महिषी
स्वपुत्रैरानीते कतिपयगृहेभ्यः प्रतिदिनम् ।
कदन्ने सन्धत्ते यदि सकुतुकं दृष्टियुगलं
कथं सीमन्तिन्यः प्रसवमभिकाङ्क्षेयुरपराः ॥ ७ ॥

**कुन्ती**—वत्स, किमवाच्यमभिहितं केनापि कुटुम्बिना ?

**भीमः**—अवाच्यं वाच्यं वा किमिव चरतां भैक्षमनिशं
प्रहारं हारं वा खर इह समानं गणयति ।

*

धनुः सज्यं त्यक्त्वा दधति यदिमे पाण्डुतनयाः
कपालं तच्चित्रं दलति न हि तेऽद्यापि हृदयम् ॥ ८ ॥

कुन्ती—(सबाष्पम्) भीमसेन, नूनं वज्रहृदयास्मि मन्दभाग्या।

भीमः—(सविमर्शम्) अम्ब, अलं रुदित्वा। ननु क्षत्रियासि।

प्रवृद्धो यः पूर्वं विषमविषदिग्धान्नहविषा
प्रदीप्तो यो लाक्षागृहदहनमित्रेण मरुता।
समिन्धे क्रोधाग्निर्मम स धृतराष्ट्रस्य तनयान्
खलान् भस्मीकर्तुं, यदि न खलु रुन्धेऽत्रभवती ॥९॥

कुन्ती—वत्स, क्षमा हि परमं धनम्।

भीमः—किमिवास्ति भिक्षुकाणामपरं धनम्?

(ततः प्रविशति युधिष्ठिरः अर्जुननकुलसहदेवैरनुगम्यमानः)

युधिष्ठिरः—सत्यम्।

सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखा।
शान्तिः पत्नी क्षमा पुत्रः षडेते मम बान्धवाः ॥ १० ॥

भीमः—(सवैलक्ष्यस्मितम्) समागताः शमिनां धुरन्धराः।

युधिष्ठिरः— वत्स, पाण्डवधुरन्धरो हि भवान्। यस्य बाहुबलमाश्रित्य रक्षिता वयं लाक्षागृहहुताशनात्।

भीमः—सोऽयं रक्ष्यत इदानीं सोदरैरानीतेन भिक्षान्नेन।

युधिष्ठिरः—वत्स, त्यज मानसं कषायम्। दैवं हि दुरतिक्रमम्।

अर्जुनः—दैवं पृष्ठतः कृत्वा पौरुषमाश्रयन्ते पुरुषर्षभाः। पश्य।

चापाचार्यस्त्रिभुवनजयी शस्त्रविद्यागुरुर्मे
नासारज्ज्वा पशुरिव मया यस्य कारुण्यलेशात्।
कृष्टो युद्धे निखिलबलमुच्छिद्य पाञ्चालराजः
सोऽहं धन्वी यदि नरपते, किङ्करं विद्धि दैवम् ॥११॥

**युधिष्ठिरः**—अर्जुन, जानामि ते पराक्रमम्। समर्थोऽसि शत्रुनिबर्हणे। किन्तु पितृव्यस्य धृतराष्ट्रस्याभिमतमविज्ञाय नास्माभिश्चेष्टितव्यम्।

**नकुलः**—न खलु न विज्ञायते तदभिमतम्। सोऽयं पितृव्यः,

पितेव पालितो येन जन्मान्धश्चक्रवर्तिना।
तस्यात्मजान् निर्विशङ्कं यो निष्कासितवान् गृहात् ॥१२॥

**युधिष्ठिरः**—वत्स, अस्ति पितामहो भीष्मः। अस्ति च धनुराचार्यो द्रोणः। तौ किलास्माकं हितं द्रक्ष्यतः।

**सहदेवः**—आर्य, निर्मलं हृदयं किल सर्वमात्मनीनमाकलयति। पश्य।

वयं पितृव्यसंमानात् प्रयान्तो वारणावतम्।
मृगा इव वधस्थानं ताभ्यामेवानुमोदिताः ॥ १३ ॥

**भीमः**—सम्यगाह सहदेवः।

कर्तुर्विनिन्दितं कर्म तथा तदनुमोदितुः।
अन्तरं नैव पश्यामि सर्पसौनिकयोरिव ॥ १४ ॥

**युधिष्ठिरः**—सर्वे भवन्तो विनीताः सुष्ठु मन्त्रयन्ते। परिपाल-

यन्तु भगवतो वेदव्यासमहर्षेर्वचनम्। यदाह तत्रभवानस्माकमेकचक्रानगरवासमुद्दिश्य 'वसतेह प्रतिच्छन्ना ममागमनकाङ्क्षिणः' इति।

कुन्ती—युज्यते। पुत्रकाः, आगच्छत। विभजामि भैक्षम्।

(सर्वे निष्क्रान्ताः)

॥ इति प्रथमोऽङ्कः ॥

## अथ द्वितीयोऽङ्कः

(ततः प्रविशति कुन्ती)

**कुन्ती**—(आकर्ण्य) अये ! किंनु खलु प्रतिवेशिगृहे रोदनध्वनिरिव श्रूयते। अङ्ग ! पश्यामि।

(ततः प्रविशति ब्राह्मणः, ब्राह्मणी, कन्यका च। त्रयोऽपि संविग्नाः। बालकश्च क्रीडन् प्रविश्य पितरावबलोकयति।)

**ब्राह्मणः**— (सविषादम्) धिक् संसारम्। नास्त्यत्र सुखलेशः। जन्मप्रभृति धर्मे श्रद्धालुना श्रान्तं मया। न स्मरामि जातुचित् धर्मे मम स्खलितम्। कोऽयं धर्मो यो न रक्षति ? यमाश्रित्य महापङ्क इव गजः सीदामि। मोक्षस्तु नभसः पृष्ठे। (सविमर्शम्) अर्थकामावेव पुरुषार्थौ यदि राजा सम्यक् पालयति। 'राजानं प्रथमं विन्देत् ततो भार्यां ततो धनम्' इत्यस्ति नीतिविदां वचनम्। मया तु विपर्यासितम्। ब्राह्मणि, न त्वया मम वचनं श्रुतं येनेयं विपत्तिः शिरसि निपतिता।

**ब्राह्मणी**—आर्य, जानासि मे त्वयि भक्तिम्। किं वा दुरनुष्ठितं मया ?

**ब्राह्मणः**—स्मरसि यन्मया नगरादन्यत्र गन्तुं व्यवसितम् ? दुर्बलो दुर्मेधाश्चास्य नगरस्य राजा। अत्र निवासो नास्माकं क्षेमङ्कर इत्यसकृदुक्तं मया। त्वया तु नानुमोदितं, न विमृष्टम्। 'इह जाता विवृद्धास्मि मातापितरौ चात्र निवसतः' इत्युक्तवती त्वम्। अदूरदर्शिनी खल्वसि। अधुना तु—

स्वर्गतस्ते पिता वृद्धो माता चानुगता पतिम्।
बान्धवा भूतपूर्वाश्च का तवात्र पुरे रतिः ॥ १ ॥

**ब्राह्मणी**—आर्य, अनुत्तरास्मि। (अश्रूणि मुञ्चति)

**ब्राह्मणः**—साध्वि, शोकनिर्विण्णेन किमपि मया जल्पितम्। मा भूद्विषादः। सर्वदा हि त्वम्—

सुशीला सत्त्वसम्पन्ना सहधर्मचरी मम।
सखी चापत्यजननी मातेव शुभकाङ्क्षिणी ॥ २ ॥

पश्य, का गतिरिदानीम्? यद्यहं बकासुरस्य भक्ष्यो भविष्यामि को नु त्वां पुत्रौ च पालयिष्यति? वृष्टिवाताहतं जीर्णकुड्यमिव शीर्यते कुटुम्बकमिदम्। न चैकाकिनी शक्नोषि धुरं वोढुम्। न खल्वेकचक्रो रथो गच्छति।

**ब्राह्मणी**—आर्य, अलं चिन्तया। अहमेव यास्यामि राक्षस-निकटम्।

अयं हि परमो धर्मो नारीणां सम्प्रकीर्तितः।
प्राणानपि परित्यज्य यद्भर्तुर्हितरक्षणम् ॥ ३ ॥

**ब्राह्मणः**—(सकरुणम्) भद्रे, मैवं वोचः।

कुमारं कन्यकाञ्चैव प्रसूय कुलतारिणीम्।
दैत्याय चेद् बलिं दद्यां धिङ्मे कृपणजीवितम् ॥ ४ ॥
ममैव जीवितस्यार्थे पत्नीं कल्याणिनीं सतीम्।
किं नु जह्यां सुखापेक्षी मतिहीनस्त्रयीमिव ॥ ५ ॥

कष्टं भोः कष्टम्।

**ब्राह्मणी**—आर्य, स्त्रीति मन्यमानः सानुकम्पो भूत्वा स दैत्यो मां विसृजेदपि ।

**ब्राह्मणः**—सौम्ये, न हि व्याघ्रो हरिणीमनुकम्पमानो दृष्टः ।

**कन्यका**—अम्ब, श्रूयतां मम वचनम् । तातेन विनाकृता त्वं सत्यं प्राणान् न धारयिष्यसि । युवाभ्यां विहीनाहं नैव जीवितुं शक्ष्यामि । सत्येवं कुतो नु जीवितशङ्का ममानुजे बालके ? धर्मतोऽहं कदाचित् परित्याज्यैव । 'अर्थो हि कन्या परकीय एव' । तात, अधुनैव मां परित्यज्य कुलं त्रायस्व । यास्यामि राक्षसमुखकुहरम् ।

(उभौ कन्यकां परिष्वज्य)

**ब्राह्मणः**—मैवं मैवं पुत्रिके,

नैव श्येनाय दास्यामि प्रियां गृहशकुन्तिकाम् ।

**ब्राह्मणी**—वत्से,

कथङ्कारमिदं श्रुत्वा हृदयं मे न दीर्यते ॥ ६ ॥

(सर्वे रुदन्ति)

**बालकः**—(वेत्रलतामादाय) तात, मा रुदः । अम्ब, मा रुदः । अक्क, मा रुदः । अनेन दण्डेन तं राक्षसं हनिष्यामि ।

(सर्वे बाष्पाणि मार्जयन्तः स्मयमानाः बालकमालिङ्गन्ति ।)

(ततः प्रविशति कुन्ती)

**कुन्ती**—पूजनीय, तपोधन, कुतोमूलमिदं दुःखम् ? तत्त्वतो

ज्ञातुमिच्छामि। ज्ञात्वा च प्रतिकर्तुं यतिष्ये यदि प्रभविष्यामि।

**ब्राह्मणः**—तपोधने, उपपन्नमेतत् सतां यदन्यदुःखसंवेदनम्। इदं दुःखं मानुषेण व्यपोहितुं न शक्यम्।

**कुन्ती**—विशदय विप्रोत्तम, यदि वाचि न मत्सरः।

**ब्राह्मणः**—हन्त! वराकस्य मे भागधेयम्। गव्यूतिमात्रे नगरात् बको नाम नरभक्षको राक्षसः प्रतिवसति। वैदेशिकी भवतीति ब्रवीमि। अस्य पुरस्य राजा मन्दधीर्दुर्बलश्च। राक्षसवैयात्य-भीतेन राज्ञा तस्मै प्रतिश्रुतम्—प्रतिदिनमाहारं प्रेषयिष्या-मीति। शकटपूर्णं मृष्टान्नं, वृषभौ द्वौ, मानुषश्चैक इति दैत्यस्य भोजनकथा। इदं च बकासुरस्य दैनिकं बलिहरणं प्रतिदिनं पौरैः पर्यायतो देयमिति राजनियोगः। स च वारः श्वः प्रभाते ममापतितः। तदेवं दुःखार्णवे मग्नं मम कुटुम्बकम्।

**कुन्ती**—किमध्यवसितं भवता?

**ब्राह्मणः**—किमन्यत्? प्रभाते सपुत्रदारः प्रविशामि राक्षसकुक्षिम्।

**कुन्ती**—(सविमर्शम्) न विषादस्त्वया कार्यः। सन्ति मे पञ्च पुत्राः। तेष्वन्यतमं त्वदर्थे प्रेषयिष्यामि।

**ब्राह्मणः**—(कर्णौ पिधाय) नैवं नैवं तपोधने! नश्वरस्य मम जीवितस्यार्थे किमतिथिं ब्राह्मणं प्राणैर्वियोजयिष्यामि?

आगतस्य गृहं घातो नृशंसो लोकगर्हितः।
श्रेयान् सदारपुत्रस्य विनाशोऽद्य मम स्वयम्॥ ६॥

सर्वथा नानुमन्ये तवाभिसन्धिम्।

**कुन्ती**—ब्रह्मन्, अवहितमनाः शृणु।

**ब्राह्मणी**—विरम विरम। न दृष्टा तादृशी सीमन्तिनी लोके या दुष्टमपि पुत्रं परित्यजेत्।

**कुन्ती**—श्रूयताम्। नास्ति मे कश्चिदनिष्टः पुत्रः। न च कोऽपि धर्मपथाच्चलितः। न च त्यजेयमेकमपि, यदि पुत्रशतं भवेत्। अस्ति मे पुत्रो मन्त्रसिद्धस्तेजस्वी वीर्यवान्। बहुधा तस्य मन्त्रवीर्यं परीक्षितम्। बलवन्तो महाकाया राक्षसास्तेन निहताः मया दृष्टपूर्वाः। स ते राक्षसबलिं तस्मै नेष्यति निहनिष्यति च तं दुरात्मानं निश्चयेन। विश्वसिहि।

**ब्राह्मणः**—महामातः!

न मानुषी वदत्येवं देवता प्रतिभासि मे।<br>
स्थाने मया तपस्तप्तं येनेदानीं प्रसीदसि ॥ ७ ॥

**कुन्ती**—रहस्यमेतत्। न कदाचन कस्मैचिदप्याख्यातव्यम्। राक्षसं निहतं श्रुत्वा मन्त्रार्थिनो जनाः पुनः मम पुत्रान् स्वार्थाय विप्रकुर्युः। अननुज्ञाता हि गुरुणा मन्त्रविद्या परस्मै न कदाचिदुपदेष्टव्या भवति। सर्वथा गोपनीयमेतत्।

**ब्राह्मणः**—मम देवते, अनुगृहीतोऽस्मि। सत्यं महात्मनां वचनं 'धर्मो रक्षति रक्षितः'।

॥ इति द्वितीयोऽङ्कः ॥

## अथ तृतीयोऽङ्कः

(ततः प्रविशति कुन्ती)

**कुन्ती**—मन्ये साध्वनुष्ठितं मया। सत्कृताः सुखं निवसामः खलु तपस्विनो विप्रस्य निवेशने। सदा चिन्तयामि किमस्य प्रियं कुर्यामिति। समुचितोऽयं कालः प्राप्तः प्रत्युपकारस्य। नागायुतबलो मम पुत्रो भीमसेनः। दृष्टं हि तस्य विक्रान्तं जतुगृहे। बलवांश्च हिडिम्बः पिष्टपेषं पेषितः। हनिष्यति मे पुत्रको बकहतकम्। चोदयिष्यामि वत्सं भीमसेनम्। न जाने किं वक्ष्यति युधिष्ठिरः।

(ततः प्रविशति भीमः)

**भीमः**—(सावेगमात्मगतम्) दुर्योधनहतक, निष्कण्टकं मन्यसे किल हस्तिनावतीप्रभुत्वम्। जतुगृहव्यतिकरेण दग्धानवगच्छसि पाण्डुपुत्रान्। निर्लज्ज, जीवन्ति पाण्डुपुत्राः। जागर्त्ययं भीमसेनस्तव मृत्युः। गणयस्व दिनानि।
(कुन्तीं दृष्ट्वा ससम्भ्रमम्) अये! अम्बा। अम्ब, किमपि गभीरं चिन्तयसीव।

**कुन्ती**—पुत्रक, दैववञ्चिताया मम चिन्ता भवति सहभूः।

**भीमः**—अम्ब, न खलु विमनायितव्यं भवत्या। वीरप्रसूरसि। अद्यापि धरते भीमः। व्यपैतु ते शोकः। समयं प्रतीक्षस्व केवलम्।

**कुन्ती**—जानामि, वत्स, जानामि। सन्ति मे पुत्रा अप्रतिमशूरा गुणशालिनश्चेति प्रत्याशया जीवामि। इदानीमसंमन्त्र्य पुत्रैः सह किञ्चित् साहसं कृतमिति तप्यते हृदयम्।

**भीमः**—(विलोक्य) मातः, भवत्या वचनमेवास्माकं संमन्त्रणम्। कदाचिदप्यविमृश्य न क्रियते भीमजनन्या। यदि वा कृतं समीकरिष्यते भीमेन।

**कुन्ती**—पुत्रक, किञ्चित् प्रतिश्रुतं मया प्रतिवेशिने ब्राह्मणाय।

**भीमः**—सम्यगनुष्ठितम्। आतिथेयः किल तत्रभवान् उपकर्ता वसतिप्रदानेन।

**कुन्ती**—आकर्णय, अस्य पुरस्यादूरवर्तिनि पर्वते वसति बकनामा दैत्यः।

**भीमः**—श्रुतं तस्य दुरात्मनो वृत्तम्। पर्यायक्रमेण तस्मै बलिमाहरन्ति पौराः।

**कुन्ती**—श्वः प्रभाते भवत्यस्य विप्रस्य पर्यायः।

**भीमः**—बाढम्।

**कुन्ती**—न चैतावत्। मानुषभोजी स राक्षसः श्रूयते। भोज्यसमाहारे मानुषोऽपि तस्मै प्रेषयितव्यः। तस्माद् बालकस्य पिता तपस्वी शोचति।

**भीमः**—विदितमवशिष्टम्। मत्पुत्रेषु कोऽपि प्रेषयिष्यत इति भवत्या प्रतिश्रुतम्।

**कुन्ती**—(मौनमवलम्बते)

**भीमः**—मातः, नास्त्यत्र किमप्यनुशोचितव्यम्। क्षत्रियाण्या यदुचितं तदनुष्ठितम्। युक्तोऽयं प्रतिश्रवः। श्रोत्रियोऽयं प्रतिवेशी प्रत्युपकारमर्हति। पश्य—

भैक्षप्रदानेन चिरं पौरैरुपकृता वयम्।
कृतं प्रतिकृतं भूयादेष धर्मः सनातनः ॥ १ ॥

अहमेव बकासुरमभिगमिष्यामि।

मातस्तवाशिषा सत्यं पोथयिष्यामि दानवम्।
चिरं जीवन्तु नगरे साधवश्चाकुतोभयाः ॥ २ ॥

**कुन्ती**—वत्स, भीम, अनुरूपमभिहितं भरतवंशप्रदीपेन मम पुत्रेण। भक्ष्यभोज्यादिकं मृष्टान्नं शकटपूरं पूरयित्वा प्रेषणीयं भवति राक्षसाय। तदेतत् सज्जीक्रियतामिति चोदयिष्यामि ब्राह्मणकुटुम्बम्।

**भीमः**—अहो! प्रियं मे। सज्जीक्रियताम्। अपरमिदं प्रियमनुष्ठितं मे भवत्या। प्रभूतमुपाहरिष्यते भोजनम्।

(ततः प्रविशन्ति युधिष्ठिरादयः)

**युधिष्ठिरः**—(विलोक्य) अये! हर्षेण उत्फुल्लाक्ष इव वत्सो भीमः।

**भीमः**—प्रभूतमुपस्थितं मे भोजनम्।

**अर्जुनः**—स्थाने खलु प्रहर्षः औदरिकस्य!

**नकुलः**—ओष्ठौ स्फुरत इवाग्रजस्य!

भीमः—पश्यत, बाहू अपि स्फुरतः !

सहदेवः—अपि हस्तद्वयेन भोक्ष्यसे ?

भीमः—तदपि भविष्यति। न केवलं भोजनमुपस्थितम्। आयोधनमपि।

युधिष्ठिरः—आयोधनमिति। केन ?

भीमः—बकासुरेण।

युधिष्ठिरः—अम्ब, किमिदानीमुपक्षिप्तम् ?

कुन्ती—पुत्रकाः, बकासुरस्य भोजनपरिकल्पनं जानीथ पौराणाम्। तदिदानीं पर्यायपतितं प्रतिवेशिनो ब्राह्मणस्य।

युधिष्ठिरः—ततस्ततः।

कुन्ती—स खल्वेकपुत्रस्तपस्वी भृशं परिदेवयते।

युधिष्ठिरः—ज्ञातमवशिष्टम्। मातः, न खलु भवत्या अध्यवसितं समर्थये।

कथं परार्थे धीमन्तं तनयं त्यक्तुमिच्छसि।
मोहिता दुःखदोषैस्ते न बुद्धिस्साधुदर्शिनी ॥ ३ ॥

यस्य वीरस्य भुजबलमाश्रित्य वयं सुखं शेमहे, यच्च चिन्तयन् दुर्योधनो निद्रां न लभते, तस्य भीमस्य प्रेषणं कथं नु त्वया सङ्कल्पितम् ? अहो ! अत्याहितम्। अविमृश्यकारी स्त्रीजनः।

भीमः—धर्मं विजानता भवता धर्मसङ्ग्रहोऽत्र द्रष्टव्यः। नहि मातुराज्ञा प्रत्यादेशमर्हति।

**युधिष्ठिरः**—वत्स, भीमसेन, बलवान् मानुषभोजी स राक्षस इति श्रूयते ।

**भीमः**—ततः किम्? राक्षसध्वंसी भीमः स्मर्यते । अलं विशङ्कया । हनिष्यामि तं दुरात्मानम् ।

**अर्जुनः**—धनुर्धरोऽहमनुगमिष्यामि ।

**भीमः**—मा मैवम् । नहि खरदंष्ट्रो मृगाधिपः सहायमपेक्षते ।

इमौ हि पीवरौ बाहू सहायौ सहजौ मम ।
बकं विध्वंसयिष्यामि सिंहः क्षुद्रमृगं यथा ॥ ४ ॥

**॥ इति तृतीयोऽङ्कः ॥**

## अथ चतुर्थोऽङ्कः

(ततः प्रविशति बकासुरः)

**बकः**—अहह! इदं हि नाम सौख्यं यदनायासेन प्रत्यहं मृष्टान्न-भोजनम्। भक्ष्यभोज्यदधिघृतसमन्वितः शकटवाह्य ओदन-राशिः, द्वौ वृषभौ, मानुषश्चैकः। सर्वमिदं मम कुक्षौ प्रक्षि-पामि। अहह! हसितुमिव इच्छामि। शिखाग्राहं गृहीत्वा एकचक्राया राजा दासीकृतो वराकः। प्रतिदिनं मम भोजनं परिकल्पयति पौरैः। 'अहिंसा परमो धर्मः' इति मूर्खालापः। कथं हि नाम शक्यमहिंसया जीवितुम्? क्षुधितो व्याघ्र-स्तृणानि किं भक्षयति? सिंहो वा पर्णानि खादति? सृष्टि-कर्तुर्नियम एषः यद् राक्षसकुलजातानां युक्तं मांसभक्षणं नर-भक्षणञ्च। नियमं रक्षन्तीति राक्षसाः। (विचिन्त्य) अहो! ममेदानीमतिक्रामति भोजनकालः। किं नु मय्युदासते पौराः? (सक्रोधम्)

किं हन्मि राजपदभाजमसत्यवाचं
दग्ध्वाथवा पुरमिदं भसितं करोमि।
किं वाखिलानपि खलान् विनिहत्य पौरान्
गोमायुगृध्रनिवहेभ्य उपाहरामि ॥ १ ॥

(दूरं दृष्टिं निक्षिपन्) हंहो! कश्चिदत्र शकटं वाहयन् उप-सर्पति। प्रतीक्षिष्ये तावत्। हा धिक्! कोऽयं पुरुषापसदः परावृत्य शकटस्थमन्नं भक्षयन्नेव दृश्यते? (साट्टहासम्) वधाय

कल्पितश्छागः पर्णं भक्षयितुमिच्छति ! (विलोक्य) अरे ! दधिघटं शून्यं कुरुते ! पायसं पिबति ! लड्डुकान् मुखे निक्षिपति ! मर्दयिष्याम्येनम्। रे पुरुष, वाहय शीघ्रम् वाहय शीघ्रम्।

(नेपथ्ये)

राक्षसापसद। एहि मन्ये ओदनं भोक्ष्यसे। भुक्तमस्माभिः।

**बकः**—अहो। वृक्षषण्डान्तरितो वराकः। (दन्तान् कटकटापयन्) अरे रे। दन्तांस्ते पाटयिष्यामि यदि शीघ्रं नागच्छसि।

(ततः प्रविशति भीमसेनः)

**भीमसेनः**—ऊर्ध्वमुख, पिशाच, पश्य मां पुरतः स्थितम्।

**बकः**—मानुषापसद, परिवेषय मे भोजनम्।

**भीमसेनः**—(सहासमुदरं परिमृजन्) सर्वं परिवेषितं मदीयजठरस्थाय भगवते हुताशनाय।

**बकः**—हा धिक्,

एवं प्रगल्भते वक्तुं तृणकल्पो हि मानुषः।
स्पर्धते विन्ध्यशैलेन प्रकटं मृन्मयो घटः ॥ २ ॥

**भीमसेनः**—दृष्टिदोषो महानेषः यन्मां पश्यसि मानुषम्।
मृत्युं पुरः स्थितं विद्धि हन्तुं त्वां धर्मदूषणम् ॥ ३ ॥

**बकः**—कथम्, कथं मां धर्मदूषणमात्थ ? अरे। कः खल्वधर्मो मया सेवितः ?

**भीमसेनः**—नरभक्षणम् ।

**बकः**—नरभक्षणं नाम मांसाशिनां राक्षसानां धर्मः ।

**भीमसेनः**—नररक्षणं नाम भूमिपालानां क्षत्रियाणां धर्मः ।

**बकः**—क्षत्रियोऽसि ?

**भीमसेनः**—बाढम्, क्षत्रियोऽस्मि ।

रक्षिता साधुलोकानां वरिष्ठो बाहुशालिनाम् ।
निषूदको हिडिम्बस्य मृत्युश्चास्मि भवादृशाम् ॥ ४ ॥

**बकः**—अहह ! मम मित्रस्य हिडिम्बस्य हन्ता कौन्तेयो भवान् ?

**भीमसेनः**—कामम् ! कौन्तेयोऽस्मि भीमसेनः ।

**बकः**—इदमस्ति मे भागधेयम् । चिरान्विष्टो मृगः स्वयमुत्पतितो व्याघ्रगह्वरम् । श्लाघनीयोऽसि मे रिपुः ।

**भीमसेनः**—इदं मे स्वस्त्ययनं यन्मां श्लाघनीयं रिपुं मन्यसे । अनुवर्तस्व ते मित्रं हिडिम्बम् ।

**बकः**—वाचाट ! क्षत्रियडिम्भ, गृहाण शस्त्रम् । शातयामि ते दर्पम् ।

**भीमसेनः**—अलं शस्त्रग्रहणविडम्बनेन,

भीमस्य शत्रुगणमर्दनगर्धनस्य
सिंहस्य मत्तगजपाटनलम्पटस्य ।
किं मूढ शस्त्रकथया ननु वज्रकल्पः
त्वन्मस्तकास्थिभिदुरोऽस्ति ममैष मुष्टिः ॥ ५ ॥

(उभौ प्रहरतः । मल्लयुद्धं प्रवर्तते । हतः पतति बकः ।)

**भीमसेनः**—(प्रविश्य) पशुमारं मारितो बकासुरः ।

(नेपथ्ये)

हते हिडिम्बरिपुणा बलीयसि बकासुरे ।
दुर्योधनस्य धूर्तस्य प्रथमं भयमागतम् ॥ ६ ॥

**भीमसेनः**—सत्यमाह दैवी वाक् ।

भगवति जगदम्ब त्वत्प्रसादाद् दुरात्मा
हत इह बकदैत्यो सन्ति चान्ये बकाभाः ।
वितर बलमथैवं हन्तुमस्माकमेतान्
जयतु भुवि नरेन्द्रो धर्मराजश्चिराय ॥ ७ ॥

(नेपथ्ये)

विजयतां धर्मराजो युधिष्ठिरः ।

॥ इति चतुर्थोऽङ्कः ॥

**इति विदुषा नडहल्ली रङ्गनाथशर्मणा प्रणीतं**
**एकचक्रं नाम रूपकं समाप्तम्**

# ಅಖಿಲ ಕರ್ಣಾಟಕ ಸಂಸ್ಕೃತ ಪರಿಷತ್

## ಬೆಂಗಳೂರು ಶಾಖೆಯ ಪ್ರಕಟಣೆಗಳು

೧. ಚಂದ್ರಾಪೀಡ ದಿಗ್ವಿಜಯಃ — ಇಂಗ್ಲಿಷ್ ರೂ. 6–00
—ಸಂ. ಡಾ॥ ಟಿ. ಎಸ್. ಕೃಷ್ಣಮೂರ್ತಿ — ಕನ್ನಡ 10–00

೨. ಕುಮಾರ ಸಂಭವೇ ತೃತೀಯಃ ಸರ್ಗಃ — ಇಂಗ್ಲಿಷ್ 6–00
—ಸಂ. ಪ್ರೊ॥ ಎಂ. ಕೆ. ಸೂರ್ಯನಾರಾಯಣರಾವ್ — ಕನ್ನಡ 10–00

೩. ದೇಶಭಕ್ತ ಚರಿತಂ ಭಾಗ–೨ — 15–00
—ಡಾ॥ ಕೆ. ಎಸ್. ನಾಗರಾಜನ್

೪. ಸ್ಟಡೀಸ್ ಇನ್ ಸಂಸ್ಕೃತ ಲಿಟರೇಚರ್ — 20–00
ಡಾ॥ ಕೆ. ರಾಜಗೋಪಾಲಾಚಾರ್

೫. ಏಕಚಕ್ರಂ (ಸಂಸ್ಕೃತ ಲಘುರೂಪಕ) — 5–00
—ವಿದ್ವಾನ್ ಎನ್. ರಂಗನಾಥಶರ್ಮಾ

೬. ಸಂಸ್ಕೃತೋತ್ಸವ ಸ್ಮರಣ ಸಂಚಿಕೆ - ೧೯೮೪ — ಉಚಿತ
—ಪ್ರ. ಸಂ. ಡಾ॥ ಬಿ. ಎಸ್. ರಾಮಕೃಷ್ಣರಾವ್

೭. ಸಂಸ್ಕೃತೋತ್ಸವ ಸ್ಮರಣ ಸಂಚಿಕೆ - ೧೯೮೫ — ಉಚಿತ
—ಪ್ರ. ಸಂ. ಡಾ॥ ಬಿ. ಎಸ್. ರಾಮಕೃಷ್ಣರಾವ್

೮. ಸಂಸ್ಕೃತೋತ್ಸವ ಸ್ಮರಣ ಸಂಚಿಕೆ - ೧೯೮೬ — ಉಚಿತ
—ಪ್ರ. ಸಂ. ಡಾ॥ ಬಿ. ಎಸ್. ರಾಮಕೃಷ್ಣರಾವ್

೯. ಸಂಸ್ಕೃತೋತ್ಸವ ಸ್ಮರಣ ಸಂಚಿಕೆ - ೧೯೮೭ — ಉಚಿತ
—ಪ್ರ. ಸಂ. ಡಾ॥ ಬಿ. ಎಸ್. ರಾಮಕೃಷ್ಣರಾವ್

೧೦. ಶ್ರಾವಣ ಪೂರ್ಣಿಮೆ (ಸಂಸ್ಕೃತೋತ್ಸವ ಸ್ಮರಣ ಸಂಚಿಕೆ - ೧೯೮೮)
—ಪ್ರ. ಸಂ. ಡಾ॥ ಬಿ. ಎಸ್. ರಾಮಕೃಷ್ಣರಾವ್ — ಉಚಿತ

೧೧. ಶ್ರಾವಣ ಪೂರ್ಣಿಮೆ (ಸಂಸ್ಕೃತೋತ್ಸವ ಸ್ಮರಣ ಸಂಚಿಕೆ - ೧೯೮೯)
—ಪ್ರ. ಸಂ. ಶ್ರೀ ಎಂ. ಕೆ. ಶ್ರೀಧರ್ — ಉಚಿತ

೧೨. ಶ್ರಾವಣ ಪೂರ್ಣಿಮೆ (ಸಂಸ್ಕೃತೋತ್ಸವ ಸ್ಮರಣ ಸಂಚಿಕೆ-೧೯೯೦)
—ಪ್ರ. ಸಂ. ಡಾ॥ ಬಿ. ಎಸ್. ರಾಮಕೃಷ್ಣರಾವ್ — ಉಚಿತ